# संस्कृतवार्ता:

## 17.07.2024

## सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा नरेन्द्र मोदिना एकेन सामाजिक – संचार माध्यमेन प्रतिपादितं यत् 'मेक-इन-इंडिया' इत्यनया परियोजनया वैश्विक – पटले भारतीय – अर्थव्यवस्थाया: वृद्धि: द्रष्टुं शक्यते।

· सर्वकारेण संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं रविवासरे सर्वदलीयम् उपवेशनम् आहूतमस्ति।

· ओमानस्य तटे तैल-वाहक-पोतस्य निमज्जनेन त्रयोदश-भारतीयान् त्रयः श्रीलङ्का-देशीयान् च समेत्य चालक-दलस्य समेपि षोडश सदस्याः विलुप्ताः सन्ति।

· अद्य मुहर्रम विद्यते। अयं दिवसः पैगम्बर-मोहम्मदस्य पौत्रस्य हजरत इमाम हुसैन इत्यस्य वीरतायाः प्रतीक-स्वरूपः अस्ति।

· स्वीडिश मुक्त टेनिस क्रीड़ा स्पर्धायाम् पुरुषैकल द्वन्द्वे द्वात्रिंशे चक्रे भारतस्य सुमितनागलस्य मुखामुखि एलियास-यमेर इत्यमुना समम् श्व: भविष्यति।

<u>पी.एम. मेक इन इंडिया</u>

प्रधानमन्त्रिणा नरेन्द्र मोदिना एकेन सामाजिक – संचार माध्यमेन प्रतिपादितं यत् 'मेक-इन-इंडिया' इत्यनया परियोजनया वैश्विक – पटले भारतीय – अर्थव्यवस्थाया: वृद्धि: द्रष्टुं शक्यते। स: सामाजिक – संचार पटले एतस्य वृध्दे: किंचित प्रमाणम् अपि दत्तवान्। तेन लिखितं यत् इदानीं भारतीय द्विचक्रिकाया: अभ्यर्थना अखिले हि विश्वे भवति। ब्रिटेन – जर्मनी – नीदरलैंण्डदेशेषु निर्यातक्षेत्रे वृद्धि: अभवत् । एतेन अन्ताराष्ट्रियापणेषु भारतस्य वर्धमान – प्रभावस्य पुष्टि : भवति। प्रधानमन्त्रिणा लिखितं यत् साम्प्रतं बिहार – राज्ये निर्मितानाम् पादत्राणानां प्रयोग: रूस – देशस्य – सैन्यबलै: क्रियते। एतदतिरिच्य प्रधानमन्त्री प्रोक्तवान् यत् क्रिकेट – विश्व – चषक – प्रतिस्पर्धाया: आसन्ने कश्मीरे – निर्मितानां क्रिकेट्-काष्ठ – वल्लीनां याचनायां अपि तीव्र वृद्धि: अभवत्। इमा: वल्लय: भारतस्योत्कृष्ट – शिल्प-कौशलस्य अन्ताराष्ट्रिय – क्रिकेट – परिदृश्ये च

देशस्य महत्प्रभावस्य उदाहरणं प्रदर्शयन्ति। स: उक्तवान यत् अमेरीका – देशे अमूल इति संस्था भारतस्य दुग्धोत्पादानां आस्वादनंम् अखिलं विश्वं कारयति। भारतस्य यू.पी.आई. इति वित्तीय-हस्तान्तरण-प्रणाली अधुना तु वैश्विक प्रणालिरूपेण प्रसिद्धा अस्ति। अनया नैकेषु देशेषु निर्बाधिरूपेण आन्तर्जालीय-माध्यम-द्वारा धनस्य हस्तान्तरण – सौविध्यम् अभवत्।

प्रधानमन्त्री कथितवान् यत् भारत – रूस देशयो: संयुक्तोद्यमेन निर्मितम् ब्रह्मोस – इति प्रक्षेपास्त्रम् इदानीं दक्षिण – चीन – समुद्रे नियोजितम् अस्ति। अयं विकास: भारतस्य सामरिक – रक्षा-क्षमता-वैश्विक – सुरक्षाया: संवर्धने च राष्ट्रस्य महत्भूमिकायां बलं प्रददाति।

<u>पी.एम. आषाढी एकादशी</u>

प्रधानमन्त्री नरेन्द्र मोदी अद्य आषाढ – मासस्य एकादशी – इत्यस्या: अवसरे जनान् वर्धापनानि दत्तवान्। सामाजिक – संचार – माध्यमेन प्रधानमन्त्रिणा शुभकामना: प्रदत्ता: यत् भगवत: विट्ठलस्य कृपया समाजे सर्वे जना: सुखिन: समृद्धिशालिन: च भवेयु:।

<u>सर्वदलीयोपवेशनम्</u>

सर्वकारेण संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं रविवासरे सर्वदलीयम् उपवेशनम् आहूतमस्ति। उपवेशनस्य अवधौ प्रशासनं संसदः सदन-द्वयस्य सुचारुतया कार्याचरणाय सर्वेभ्यः राजनीतिक-दलेभ्यः सहयोगस्य अनुरोधं करिष्यति। वित्त-सङ्कल्पना सत्रम् अस्य मासस्य द्वाविंशतिः दिनात् अगस्त-मासस्य द्वादश-दिनांकं यावत् चलिष्यति। केन्द्रीयम् आय-व्यय-विवरणं जुलाई त्रयो विंशे प्रस्तोष्यते। इदं हि नरेन्द्र-मोदिनः नेतृत्वयुतस्य प्रशासनस्य तृतीय-कार्यकालस्य प्रथमं वित्त-सङ्कल्प-पत्रं भविष्यति। विगते मासे राष्ट्रपतिः द्रौपदी मुर्मू-वर्या संसदः उभयोः सदनयोः संयुक्तोपवेशनं सम्बोधयन्ती अवोचत् यत् इदं वित्त-सङ्कल्प-पत्रं प्रशासनस्य दूरगामी नीतिनाम् अथ च भावि-दृष्टिकोणस्य प्रभावी प्रपत्रं भविष्यति।

## स्वास्थ्य-मन्त्री समीक्षोपवेशनम्

स्वास्थ्य-मन्त्री जगत-प्रकाशनड्डा अद्य नवदिल्ल्यां केन्द्रीय औषधि-मानक-नियन्त्रण-सङ्घटनस्य अधिकारिभिः सह एकं समीक्षोपवेशनम् अकरोत्। उपवेशनस्य समये स्वास्थ्य-सचिवः अपूर्व-चन्द्रा अथ च अन्ये वरिष्ठाधिकारिणः उपस्थिताः अभवन्। केन्द्रीय औषधि-मानक-नियन्त्रण सङ्घटनं देशे औषध-चिकित्सोपकरणानां सौन्दर्य-प्रसाधनानां च गुणवत्तां सुरक्षां च नियन्त्रयति।

श्रीमता नड्डा-वर्येण अस्य मासस्य आरम्भे राष्ट्रिय-स्वास्थ्य-प्राधिकरणस्य वरिष्ठाधिकारिभिः सह आयुष्मान-भारत प्रधानमन्त्री-जन-आरोग्य-योजना अथ च आयुष्मान-भारत-डिजिटल-मिशन इत्येषाम् अपि समीक्षा कृतासीत्।

## विदेशमन्त्री मॉरिशस

विदेश-मन्त्रिणा डॉ. एस.जयशङ्करेण अद्य मॉरीशस-देशस्य पूर्व-प्रधानमन्त्रिणा नवीन-रामगुलाम इत्यनेन अथ च पॉल बेरेन्जर इत्यमुना सह मेलनं कृतम्। डॉक्टर-रामगुलामेन सह मेलनावसरे डॉक्टर-जयशङ्करेण स्थायी द्विपक्षीय-सहयोग संवर्धनाय प्रतिबद्धता प्रकटिता। श्री पॉल बेरेन्जर इत्यमुना सह मेलन-विषये विदेश-मन्त्री अवादीत् यत् तेन समसामयिक-वैश्विक-विषयेषु सार्थक-संवादो विहितः।

## ओमान – तैलवाहन

ओमानस्य तटे तैल-वाहक-पोतस्य निमज्जनेन त्रयोदश-भारतीयान् त्रयः श्रीलङ्का-देशीयान् च समेत्य चालक-दलस्य समेपि षोडश सदस्याः विलुप्ताः सन्ति। ओमानस्य समुद्र-सुरक्षा-केन्द्रस्य अनुसारं 'प्रेस्टीज फाल्कन' नाम्नः पोतः ओमानस्य औद्योगिक-पोत-पत्तन-दुकमस्य निकषा निमज्जितः। अयं पोतः यमनस्य अदन-पोत-पत्तनं प्रति प्रस्थितः। ओमानस्य अधिकारिभिः सामुद्रिकाधिकारिभिः सह पोतस्य अन्वीक्षणं साहाय्योद्धार-कार्यं च आरब्धम्।

## मुहर्रम

अद्य मुहर्रम विद्यते। अयं दिवसः पैगम्बर-मोहम्मदस्य पौत्रस्य हजरत इमाम हुसैन इत्यस्य वीरतायाः प्रतीक-स्वरूपः अस्ति। तेन कर्बलायां सत्यस्य कृते निज प्राणाहुतिः कृतासीत्। अत्रावसरे ताजिया यात्राः विधीयन्ते। देशस्य पृथक्-पृथक् भागेषु इमाः यात्राः निध्याय आरक्षि-विभागेन यातायात परामर्शः प्रसारितः। देशे सर्वत्र सुरक्षायाः व्यापक-प्रबन्धाः कृताः।

## टेनिस क्रीडा-स्पर्धा

स्वीडिश मुक्त टेनिस क्रीड़ा स्पर्धायाम् पुरुषैकल द्वन्द्वे द्वात्रिंशे चक्रे भारतस्य सुमितनागलस्य मुखामुखि एलियास-यमेर इत्यमुना समम् श्वः भविष्यति। पुरुष युगल क्रीडायां भारतस्य सुमितनागलस्य पोलैंडदेशस्य च करोल-ड्रेज-विक्की इत्यस्य युगलं फ्रांस देशस्य एलेक्सजेंडर-मुलरस्य, लुकावान-एश इत्यस्य च युगलेन साकं योत्स्यति। सुमितः पेरिस-ओलंपिक क्रीडामहाकुम्भस्य आयोजनात् पूर्वं उत्कृष्ट-प्रदर्शनं-विधाय आत्मविश्वास-वर्धनं कर्तुं क्रीडांगणे अवतरिष्यति। ध्येयमस्ति यत् सुमित-नागलेन अस्मिन् सत्रे समाह्वान-पदक-द्वयं विजितं अस्ति।

।। इति वार्ताः ।।